(ख) 'अग्निहोत्रं जुहोती' व्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यशास्त्रात् । तस्य गुणस्य प्रख्यापकस्य प्रापकस्य शास्त्रस्य विद्यमानत्वात् , अग्निहोत्रशब्दः कर्मनामधेयमिति यावत् ।।

**चतुर्थो - वर्गः**

8. अर्थसङ्ग्रहमाश्रित्य अर्थवादस्वरूपं भेदोपभेदपूर्वकं विविच्यताम् ? 20

9. 'अङ्गानां क्रमबोधको विधिः प्रयोगविधिः' इतिलक्षण-मधिकृत्य षट्प्रमाणपुरस्सरं प्रयोगविधिर्निरूपणीयः? 20



**A** **(Printed Pages 4)**

**Roll No.____________**

# AS- 2144

## एम. ए. (चतुर्थ सेमेस्टर) परीक्षा, 2015

## संस्कृत

## वर्ग 'क' -वेद

### द्वितीयप्रश्नपत्रम्

### (ब्राह्मण मीमांसाच)

समयः - घटात्रयम् पूर्णाङ्कः : 100

**निर्देश :** केवलं **पञ्च** प्रश्नाः समाधेयाः। तत्र **प्रथमः** प्रश्नोऽनिवार्यः। प्रतिवर्गादेकैकः प्रश्नोऽवश्यं ग्राह्य। सर्वे प्रश्नाः समानाङ्कभाजः सन्ति।

1. अधोलिखितेषु सङ्क्षिप्तटिप्पण्यः कार्याः - 4×5=20

(क) एक विंशोऽयं पुरूषः

(ख) तानूनप्त्रेठिटः

(ग) उपसदाख्यं कर्म

(घ) नियमविधिः

(ङ) निषेध-प्रयोजनम्

**प्रथमो - वर्ग :**

2. अधोलिखितयोः सप्रसङ्गं व्याख्या विधेया ? 20

(क) वेनोऽमाद्वा ऊर्ध्वा अन्ये प्राणा वेनन्त्यवाञ्चोऽन्ये तस्माद्वेनः प्राणो वा अयं सन्नाभेरिति तस्मान्नाभिस्तन्नाभेनीभित्वं प्राणवांस्मिस्तद्धाति।।

(ख) जितयो वै नामैता यदुपसदोऽसपत्नां वा एताभिर्देवा विजितिं व्यजयन्त।।

3. सप्रसङ्ग व्याख्या विधेया? 20

(क) तस्मादुपाशुं वाचा चरितव्यं सोमे राजनि क्रीते गन्धर्वेषु हि तर्हि वाम्भवति साऽग्नावेव प्रणीयमाने पुनरागच्छति।

(ख) तस्मात् सुपूर्वाह्ण एव पूर्वयोपसदा प्रचरितव्यं स्वपराह्णेऽपरया तावन्तमेव तद् द्विषते लोकं परिशिनष्टि ।

**द्वितीयो - वर्गः**

4. ऐतरेयब्राहमणमाश्रित्य प्रवर्ग्याख्यं कर्म निरूपणीयम् ? 20

5. (क) आतिथ्येष्टिविधानं निरूपणीयम् ? 10×2=20

(ख) उपसदङ्गभूतं व्रतोपायनं निरूपणीयम् ?





**तृतीयो - वर्ग :**

6. अधोलिखितयोर्ब्याख्या सन्दर्भपुरस्सरं कार्या? 20

(क) कर्मजन्यफलस्वाम्यबोधको विधिरधिकार विधिः। कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वम् । स च यजेत स्वर्गकामः इत्यादिरूपः। स्वर्गमुद्दिश्ययागं विदधताऽनेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते।।

(ख) सेयं श्रुतिरितरप्रमाणापेक्षया बलवती। तेषां वचन- कल्पन द्वारा क्रमप्राणत्वात् । अतएवाश्विनग्रहस्य पाठक्रमात्तृतीयस्थाने ग्रहण प्रसक्तौ अश्विनो दशमो गृहयत इति वचनाद् दशमस्थाने ग्रहणमिव्युक्तम् ।।

7. अधोलिखितयोः ससन्दर्भविवेचनं विधेयम् ? 20

(क) सा च द्विविधा श्रौती लाक्षणिकी चेति। तत्र ‘अत्र ह्येवावपन्ती’ति श्रौती परिसङ्ख्या। एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् । पञ्चपञ्च नखा भक्ष्या इति तु लाक्षणिकी। इतरनिवृत्तिवाचकपदाभावात् । अत एवैषा त्रिदोषग्रस्ता।।